श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री फणीन्द्रक्ष्माभृत्स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री फणीन्द्रक्ष्माभृत्स्तोत्रम् ॥

अस्ति श्रीमानवनितिलको वेङ्कटो नाम शैलो
भूयानेको भुवि परिणतः पुण्यराशिः प्रजानाम्।
सारोद्धारस्सकलजगतां स्थापितः क्वापि धात्रा
यस्मिन् साक्षात्परमपुरुषो दीव्यति श्रीसहायः॥ 1 ॥

सौवर्णात्मा मरतकमयैर्वज्रवैडूर्यरूपैः
नीलोत्कीर्णैः स्फटिकघटितैः पद्मरागप्रणीतैः।
नानारत्नाकृतिभिरखिलैस्सानुभिस्सम्भृतश्रीः
सर्वैस्सोऽयं सुरगिरिरिति प्रत्यभिज्ञायते यः॥ 2 ॥

उर्वीगुर्वी मुदधिवसनामुद्वहन् भूललग्नाम्
उत्तुङ्गाग्रैरुपरिशिखरैरुल्लिखन्नूर्ध्वसीमाम्।
तिर्यग्दिव्याकृतिमहिमतश्छादयन् यो दिगन्तान्
विष्णुस्साक्षादयमिति जनैस्तर्क्यते भूवराहः॥ 3 ॥

मन्दस्पन्दानिलविवलितातात्रबालप्रवाल -
स्वैरास्वादप्रमदविहरत्कोकिलालापगर्भैः।
सान्द्रच्छायैस्सरसकुसुमैस्सौरभाकृष्टभृङ्गैः
सर्वैर्वृक्षैस्सततफलितैर्यः सदा सम्भृतश्रीः॥ 4 ॥

स्वैः पाद्यार्घ्यप्रभृति ददतः स्यन्दमानैर्मरन्दैः
भव्यामोदैः पवनगलितैरर्चयन्तः प्रसूनैः।

वृन्तोद्धान्तैः परिणतफलैर्नित्यक्लृप्तोपहाराः
    धन्या वृक्षा यदुपरि रमावा समाराधयन्ति ॥ 5 ॥

पुण्यामोदप्रसवलहरीवासिताशावकाशैः
    दूरे दूरे दुरितशमनैः पश्यतां प्राणभाजाम्।
श्रीमन्नारायणवरशिरोभूषणीभावभव्यैः
    स्निग्धैः कृष्णैस्तरुणतुलसीकाननैः पावनो यः ॥ 6 ॥

नित्याशुष्यत्सलिलसरसीस्यन्दसन्धुक्षितानां
    श्रावंश्रावं श्रवणसुभगं निस्वनं निर्झराणाम्।
धत्ते धाराधररवधिया नृत्यतो नीलकण्ठान्
    केकाकण्ठान्निजसहचरीनित्यनेत्रोत्सवान् यः ॥ 7 ॥

दंशं दंशं कुशनवदलैर्दर्भदूर्वाप्रवालान्
    खादङ्खादं पृथुमृदुफलं भूरुहां भूविकीर्णम्।
पायंपायं यदुपरि पयः पावनं दीर्घिकाणां
    मादंमादं विहरति मृगीयूथपः कृष्णसारः ॥ 8 ॥

धीराः सिंहाः कुपितशरभाः कुञ्जरेन्द्रा मदान्धाः
    घोरा व्याघ्रा कटुककिटयो भीमभल्लूकसङ्घाः।
सर्वे चान्ये सहजरिपवो जन्तवो यत्रवासाः
    सङ्गाहन्ते प्रशमितरुषः स्वैरमेकोदपाने ॥ 9 ॥

श्रीमद्वादिप्रवरभयकृद्देशिकोक्तं फणीन्द्र -
    क्ष्माभृत्स्तोत्रं भुवनमहितं शब्दतोऽर्थाच्च साधु।
श्रुत्वा प्रीता भवतु जनता काव्यनाट्यादिदक्षाः
    नैतत्तुल्यं भवति भवति स्मापि यावद्धरित्र्याम् ॥ 10 ॥

॥ इति श्री फणीन्द्रक्ष्माभृत्स्तोत्रं समाप्तम् ॥